# संस्कृत वार्ता:

दिनाङ्क : 06/07/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्र-मोदी स्वस्य त्रिदेशीय-हिन्द-प्रशान्त-प्रवासस्य प्रथमे चरणे इण्डोनेशिया-देशस्य जकार्तायां सम्प्राप्तवान्।
- केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः अवदत् यत् सहकार-आन्दोलनम्, परिष्कार-अङ्कीकरण-व्यावसायिकप्रबन्धनानां माध्यमेन विस्तारस्य नूतने चरणे प्रविशति।
- भगवतः जगन्नाथस्य रथयात्रायाः अवसरे त्रिशताधिकानि विशेष-रेलयानानि प्रचालयिष्यन्ते इति रेलमन्त्री अश्विनी वैष्णव: प्रावोचत्।
- भारत-ऋतु-विभागेन अद्य गुजरात्, कोङ्कण, गोवा, मध्यप्रदेश-महाराष्ट्र-छत्तीसगढ-प्रदेशेषु अति-वृष्ट्यै, रक्त-वर्णीया सञ्चेतना प्रसरिता।
- फीफा विश्वकप क्रीडायां पुर्तगालदेश: स्पेनदेशं राउंड ऑफ 16 इत्यस्यां क्रीडायां सम्मुखीकरिष्यति।

-----------------------------------------------

<u>प्रधानमन्त्री-इंडोनेशिया</u>

प्रधानमन्त्री नरेन्द्र-मोदी स्वस्य त्रिदेशीय-हिन्द-प्रशान्त-प्रवासस्य प्रथमे चरणे इण्डोनेशिया-देशस्य राजधान्यां जकार्तायां सम्प्राप्तवान्। जकार्ता-विमानपत्तने इण्डोनेशिया-देशस्य राष्ट्रपतिना प्रबोवो-सुबियान्तो इत्यमुना स्वयमुपस्थाय प्रधानमन्त्रिणः भव्यं स्वागतं विहतम् । तत्र स्थानीय-समुदायेन प्रवासी-भारतीयैश्च पारम्परिक-सांस्कृतिक-प्रस्तुतिभिः सह तस्य उत्साहपूर्णं अभिनन्दनं कृतम्। अष्टादशाधिक-द्विसहस्रतमवर्षात् द्विपक्षीय-सम्बन्धानां व्यापक-रणनीतिक-सहयोग-स्तरस्य प्राप्तेः परं प्रधानमन्त्रिणः इयं प्रथमा द्विपक्षीय-यात्रा अस्ति। प्रवासेऽसौ राष्ट्रपतिना प्रबोवो इत्यमुना साकं द्विपक्षीय-वार्तां विधाय सम्बन्धानां समीक्षां विधास्यति , सहैव सांस्कृतिक-नगरे योग्याकर्ता-स्थितं ऐतिहासिकं प्रम्बानन- मन्दिर-परिसरमपि द्रक्ष्यति, यत्र भारत-इण्डोनेशिया-देशौ मिलित्वा संरक्षण-कार्यं करिष्यतः। अत्रावसरे

प्रधानमन्त्री जकार्ता-नगरे प्रवासी-भारतीयानां समूहमपि सम्बोधयेत्। प्रस्थानात् पूर्वं प्रदत्ते स्वकीय-वक्तव्ये तेन निगदितं यत्, प्रवासोऽयं भारतस्य ऐक्ट ईस्ट-नीतेः, महासागरीय-दृष्टिकोणस्य सहैव मुक्त-हिन्द-प्रशान्त-क्षेत्रस्य च लक्ष्यं सुदृढीकरिष्यति। यात्रायाः द्वितीये चरणे, अष्ट-दिनाङ्कात् दश-दिनाङ्कं यावत्, प्रधानमन्त्री ऑस्ट्रेलिया-देशस्य प्रधानमन्त्रिणः एन्थनी-अल्बनीज इत्यस्य निमन्त्रणं स्वीकृत्य मेलबर्न-नगरं गमिष्यति। यत्र सः रक्षा-सुरक्षा-व्यापार-निवेश-उच्चप्रविधि-क्षेत्रेषु विस्तृतचर्चां विधास्यति। सहैव तृतीय-भारत-ऑस्ट्रेलिया-वार्षिक-शिखर-सम्मेलने भागं भजिष्यति। अन्तिमे चरणे, जुलाई-मासस्य दश-एकादश दिनाङ्कयोः, सः न्यूजीलैण्ड-देशस्य प्रधानमन्त्रिणः क्रिस्टोफर लक्सन इत्यस्य आह्वानेन ऑकलैण्ड-नगरं प्राप्स्यति। विगत-चत्त्वारिंशत्- वर्षेषु कस्यचित् भारतीय-प्रधानमन्त्रिणः इयं प्रथमा न्यूजीलैण्ड-यात्रा वर्तते, यत्र आर्थिक-व्यापारिक-सहयोगं वर्धयितुं मन्त्रणा भविष्यति ।

---------------------------------------------

<u>प्रधानमन्त्री</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य आध्यात्मिक-गुरुं परमं पवित्रं दलाई लामा-वर्यं तस्य एकनवतितमे जन्मदिने शुभाशयाः प्रेषिताः। सामाजिकान्तर्जालीये पटले लिखिते सन्देशे श्रीमोदी अवदत् यत्, तस्य शान्तेः सौहार्दस्य च सन्देशः सम्पूर्णे विश्वस्मिन् जनानां कृते मार्गदर्शकशक्तित्वेन विद्यते। प्रधानमन्त्री अवदत् यत्, दलाई लामा वर्यस्य नैतिकं आध्यात्मिकं च जीवनम्, वैश्विक-कल्याणार्थं तस्य प्रतिबद्धतां प्रदर्शयति। अत्रावसरे सः दलाई लामा वर्यस्य दीर्घं स्वस्थं च जीवनं प्रार्थयत्।

---------------------------------------------

<u>अमितशाहः</u>

केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः अद्य अवदत् यत् सहकार-आन्दोलनम्, परिष्कारस्य, अङ्कीकरणस्य, व्यावसायिकप्रबन्धनस्य च माध्यमेन विस्तारस्य नूतने चरणे प्रविशति। सहकारिता-मन्त्रालयस्य पञ्चमं संस्थापना-समारोहं सम्बोधयन् श्रीशाहः अवदत् यत्

प्रत्येकस्मिन् क्षेत्रे पञ्चसु उत्तम-प्रदर्शन-सहकार-संस्थानां परिचयं कर्तुं श्रेणी-संरचना घोषिता अस्ति।

गृहमन्त्री श्रीशाहः सहकारिता-मन्त्रालयस्य प्रशंसाम् अकरोत् यत् विगतपञ्चवर्षाणि यावत् सहकारस्य माध्यमेन समृद्धेः मन्त्रस्य अनुसरणं कृत्वा कोटिशः जनानां जीवनं परिवर्तितम् अस्ति।

-----------------------------------------------

## रथयात्रा-वैष्णवः

रेलमन्त्री अश्विनी-वैष्णवः प्रावोचत् यत् अस्मिन् वर्षे भगवतः जगन्नाथस्य रथयात्रायाः अवसरे त्रिशताधिकानि विशेष-रेलयानानि प्रचालयिष्यन्ते। एतानि यानानि नियमितरूपेण प्रचलद्भ्यः अष्टशताधिकेभ्यः रेलयानेभ्यः अतिरिच्य भविष्यन्ति, येन यात्रिणां गतागतं सौकर्यमयं स्यात्। अद्य नवदिल्ल्यां संवाददातृभिः सह सम्भाषमाणः श्रीवैष्णवः प्रोदीरितवान् यत्, रथयात्रायाः सुचारु-सञ्चालनं सुरक्षित-प्रबन्धनं च सुनिश्चेतुं सः अद्यैव रेल-विभागीय-सिद्धतायाः उच्चस्तरीयां समीक्षां विधास्यति।

-----------------------------------------------

## निर्वाचनायोग-पश्चिम-बङ्गाल

निर्वाचनायोगेन पश्चिम-बङ्गाल-राज्यस्य राज्यसभायाः त्रिषु आसनेषु उप-निर्वाचनस्य घोषणा कृता अस्ति। राज्यसभायाः सदस्यानां सुखेन्दु शेखर् रे, सुष्मिता देवः, प्रकाश् चिक् बड़ाईकः इत्येतेषां त्यागपत्रस्यानन्तरं स्थानानि रिक्तानि आसन्। निर्वाचनस्य सञ्चेतना श्वः प्रकाशिता भविष्यति, नामाङ्कनस्य अन्तिमा तिथिः जुलाई-मासस्य चतुर्दश-दिनांकं यावत् अस्ति। जुलाई-मासस्य पञ्चदश-दिनाङ्के नामाङ्कनानां परीक्षणं भविष्यति। एतेषां आसनानां कृते जुलाईमासस्य चतुर्विंशति-दिनाङ्के मतदानं भविष्यति, तस्मिन् एव दिने मतानां गणनाऽपि भविष्यति।

-----------------------------------------------

## <u>महाराष्ट्र-वर्षा</u>

महाराष्ट्रस्य विशालः भागः प्रावृट्-वृष्ट्या निरन्तरं प्रभावितः अस्ति, यत्र मुम्बई-कोङ्कणप्रदेशयोः च व्यापकरूपेण जलप्लावनं, भूस्खलनं, भवनानां पतनं, मार्गेषु, रेल-विमानयानेषु च महती बाधा दृश्यते। सम्पूर्णे राज्ये आदिवसं यावत् प्रचण्डवृष्ट्याः अनुवर्तनेन अधिकारिणः सजगतायां तिष्ठन्ति। अधिकारिणः नागरिकान् अनावश्यकीं यात्रां परिहर्तुं प्रार्थयन्ति। मुख्यमन्त्री देवेन्द्र फड्नविसः एस्. डी. आर्. एफ़्. इत्यस्य स्थितिं समीक्षितवान्, सर्वेभ्यः अधिकारिभ्यः शीघ्रं समन्वित-कार्याचरणाय निर्देशं च प्रदत्तवान्। प्रचण्डवृष्ट्या सम्पूर्णे कोङ्कणप्रदेशे बह्व्यः भूस्खलनानि अपि अभवन्, येन मुम्बई-गोवा-राष्ट्रिय-राजमार्गे यातायातः प्रभावितः। अत्रान्तरे, भारत-ऋतु-विभागेन अद्य गुजरात्, कोङ्कण, गोवा, मध्यप्रदेश-महाराष्ट्र-छत्तीसगढ-प्रदेशेषु अत्यधिक-वृष्ट्या सह, केषुचित् स्थानेषु अत्यधिक-अति- वृष्ट्यै, रेड्-अलर्ट् इति रक्त वर्णीया सञ्चेतना प्रसरिताऽस्ति। उत्तरी-अरब-सागरस्य केषुचित् भागेषु, गुजरातराज्ये, हरियाणा-पञ्जाब्-राज्ययोः शेषभागेषु, राजस्थानस्य केषुचित् भागेषु च अग्रिमेषु त्रिषु दिनेषु नैर्ऋत्य-प्रावृट्चक्रस्य अग्रे गन्तुं परिस्थितिः अनुकूलास्ति इति विभगेनोक्तम्।

---

## <u>विम्बल्डन्-टेनिस</u>

गतरात्रौ विम्बल्डन्-टेनिस्-क्रीडायां, सर्बिया-देशस्य नोवाक्-जोकोविच इत्यसौ रूस-देशस्य रोमन-सफिउलिन् इत्येतं पराजित्य पुरुष-एकल-स्पर्धाया: प्रागुपान्त्य-चक्रीय-क्रीडायां प्रविष्टवान्। अग्रिमायां प्रागुपान्त्यचक्रीय-क्रीडायां जोकोविच् इत्येष: फ़ेलिक्स् आगर-अलियासिमे इत्यनेन, एलेजाण्ड्रो डेविडोविच फ़ोकिना इत्यनेन वा सम्मुखीभूयात्।

---

## <u>फ़ीफ़ा</u>

फीफा-विश्वकप-क्रीडायां पुर्तगालदेश: स्पेनदेशं राउंड ऑफ 16 इत्यस्यां क्रीडायां सम्मुखीकरिष्यति। अद्य मेक्सिको-नगरस्य एज़्टेका-क्रीडाङ्गणे मेक्सिको-देशस्य विरुद्धं नाटकीयतया त्रीणि-द्वे इत्यङ्कैः विजयं प्राप्य इङ्ग्लेण्ड्-देशः फ़ीफ़ा-विश्वकप्-क्रीडायाः प्रागुपान्त्य-चक्रीय-द्वन्द्वे प्रविष्टवान्। अन्यस्यां स्पर्धायां, ब्राजील्-देशस्य क्रीडकः नेमार-जूनियर-इत्येषः अन्ताराष्ट्रिय-फुट्बाल्-क्रीडायाः निवृत्तेः घोषणाम् अकरोत्, तत्रैव गतरात्रौ फीफा-विश्वकप्-राउण्ड्-आफ्-16 चक्रे नार्वे-देशेन ब्राजील-देश: द्वे-एकम् इत्याङ्कैः पराजितम्।

।। इति वार्ता: ।।